## ॥ श्रीरुद्रप्रश्नः ॥

ओं नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नमः॑ । नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नमः॑ । या त॒ इषुः॑ शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनुः॑ । शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय । या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी । तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शंता॒भिचा॑कशीहि । यामिषुं॑ गिरिशंत॒ हस्ते᳚ । बिभ॒र्ष्यस्त॑वे । शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हिꣳसीः॒ पुरु॑षं॒ जग॑त् । शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑वदामसि । यथा॑ नः॒ सर्व॒मिज्जग॑द॒यक्ष्मꣳ सु॒मना॒ अस॑त् । अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक् । अहीग्ं॑श्च॒ सर्वा᳚ञ्ज॒म्भय॒न्त्सर्वा᳚श्च यातुधा॒न्यः॑ । अ॒सौ यस्ता॒म्रो अ॑रु॒ण उ॒त ब॒भ्रुः सु॑म॒ङ्गलः॑ । ये चे॒माꣳ रु॒द्रा अ॒भितो॑ दि॒क्षु । श्रि॒ताः स॑हस्र॒शोऽवै॑षा॒ꣳ॒ हेड॑ ईमहे । अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः । उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑ । उ॒तैनं॒ विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः । नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मी॒ढुषे᳚ । अथो॒ ये अ॑स्य॒ सत्त्वा॑नो॒ऽहं तेभ्यो॑ऽकर॒न्नमः॑ । प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑यो॒र्ज्याम् । याश्च॑ ते॒ हस्त॒ इष॑वः॒ परा॒ ता भ॑गवो वप । अ॒व॒तत्य॒ धनु॒स्त्वꣳ सह॑स्राक्ष॒ शते॑षुधे । नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो नः॑ सु॒मना॑ भव । विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ उ॒त । अने॑श॒न्नस्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑ । या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑ । तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज । नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे᳚ । उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्यां॒ तव॒ धन्व॑ने । परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑ । अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तम् ॥ १ ॥

# || Śrīrudrapraśnaḥ ||

oṁ nama̍ste rudra ma̱nyava̍ u̱tota̱ iṣa̍ve̱ nama̍ḥ | nama̍ste astu̱ dhanva̍ne bā̱hubhyā̍mu̱ta te̱ nama̍ḥ | yā ta̱ iṣu̍ḥ śi̱vata̍mā śi̱vaṁ ba̱bhūva̍ te̱ dhanu̍ḥ | śi̱vā śa̍ra̱vyā̍ yā tava̱ tayā̍ no rudra mṛḍaya | yā te̍ rudra śi̱vā ta̱nūragho̱rā'pā̍pakāśinī | tayā̍ nasta̱nuvā̱ śanta̍mayā̱ giri̍śaṁtā̱bhicā̍kaśīhi | yāmiṣu̍ṁ giriśaṁta̱ haste̎ | bibha̱rṣyasta̍ve | śi̱vāṁ gi̍ritra̱ tāṁ ku̍ru̱ mā higm̐̍sī̱ḥ puru̍ṣa̱ṁ jaga̍t | śi̱vena̱ vaca̍sā tvā̱ giri̱śācchā̍vadāmasi | yathā̍ na̱ḥ sarva̱mijjaga̍daya̱kṣmagm̐su̱manā̱ asa̍t | adhya̍vocadadhiva̱ktā pra̍tha̱mo daivyo̍ bhi̱ṣak | ahī̍g̐śca̱ sarvā̎ñja̱mbhaya̱ntsarvā̎śca yātudhā̱nya̍ḥ | a̱sau yastā̱mro a̍ru̱ṇa u̱ta ba̱bhruḥ su̍ma̱ṅgala̍ḥ | ye ce̱māgm̐ru̱drā a̱bhito̍ di̱kṣu | śri̱tāḥ sa̍hasra̱śo'vai̍śā̱gm̐heḍa̍ īmahe | a̱sau yo̍'va̱sarpa̍ti̱ nīla̍grīvo̱ vilo̍hitaḥ | u̱taina̍ṁ go̱pā a̍dṛśa̱nnadṛ̍śannudahā̱rya̍ḥ | u̱taina̱ṁ viśvā̍ bhū̱tāni̱ sa dṛ̱ṣṭo mṛ̍ḍayāti naḥ | namo̍ astu̱ nīla̍grīvāya sahasrā̱kṣāya̍ mī̱ḍhuṣe̎ | atho̱ ye a̍sya̱ sattvā̍no̱'haṁ tebhyo̍'kara̱nnama̍ḥ | pramu̍ñca̱ dhanva̍na̱stvamu̱bhayo̱rārtni̍yo̱rjyām | yāśca̍ te̱ hasta̱ iṣa̍vaḥ parā̱ tā bha̍gavo vapa | a̱va̱tatya̱ dhanu̱stvagm̐saha̍srākṣa̱ śate̍ṣudhe | ni̱śīrya̍ śa̱lyānā̱ṁ mukhā̍ śi̱vo na̍ḥ su̱manā̍ bhava | vijya̱ṁ dhanu̍ḥ kapa̱rdino̱ viśa̍lyo̱ bāṇa̍vāgm̐ u̱ta | ane̍śanna̱syeṣa̍va ā̱bhura̍sya niṣa̱ṁgathi̍ḥ | yā te̍ he̱tirmī̍ḍhuṣṭama̱ haste̍ ba̱bhūva̍ te̱ dhanu̍ḥ | tayā̱'smān vi̱śvata̱stvama̍ya̱kṣmayā̱ pari̍bbhuja | nama̍ste a̱stvāyu̍dhā̱yānā̍tatāya dhṛ̱ṣṇave̎ | u̱bhābhyā̍mu̱ta te̱ namo̍ bā̱hubhyā̱ṁ tava̱ dhanva̍ne | pari̍ te̱ dhanva̍no he̱tira̱smānvṛ̍ṇaktu vi̱śvata̍ḥ | atho̱ ya i̍ṣu̱dhistavā̱re a̱smannidhe̍hi̱ tam || 1 ||